प्रक्षाल्याचम्य शुध्यति” इति च देवलः। “मानुषास्थि वसाविष्ठामार्त्तवं मूत्ररेतसी। मज्जानं शोणितं वापि परस्य यदि संस्पृशेत्। स्नात्वा प्रमृज्य लेपादीनाचम्य स शुचिर्भवेत्। तान्येव स्वानि संस्पृश्य पूतःस्यात् परिमार्ज्जनात्” देव०। “चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सचेलोजलमाविशेत्”। परा०। “श्वपचर्म्मिकप्रेतहारकशवानि संस्पृश्य देवीराप इत्यभिमन्त्रितैर्जलैः स्नातः पूतोभवत्यजीर्णवान्ते श्मश्रुकर्म्मणि पशुदिवामैथुने च” हारीतः “अथ सांस्पर्शिकं व्याख्यास्यामः “चण्डालश्मशानप्रेतहारकरजस्वलासूतिकाः संस्पृश्याऽनुदितेऽस्तमिते स्कन्दित्वा चाप्सु स्कन्दित्वाक्षिस्पन्दने कर्णक्रोशने चित्याहरणे यूपसंस्पर्शने” इत्युपक्रम्य “सचेलं स्नात्वा पुनर्मानो जपेत्” कश्य०। “श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं यूपं चितिं चितिकाष्ठं मद्यभाण्डं सस्नेहं मानुषास्थि शवस्पृशं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचेलवासा अम्भोऽवगाह्योत्तीर्य्याग्निमुपस्पृशेत्” च्यव० “शुना घ्रातावलीढस्य नखैर्विदलितस्य वा। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपधूननम्” शाता०। अशुचिं संस्पृशेद्यस्तु एकएव स दुष्यति। तं स्पृष्ट्वान्यो न दुष्येत्तु सर्व्वद्रव्येष्वयं विधिः” वृद्धशा०। “यस्य स्पर्शे आचमनमात्रं सोऽत्राशुचिः” हेमा०। “श्वराहखरानुष्ट्रान् वृकगोमायुवानरान्। काककुक्कुटगृध्रांश्च स्पृष्टा स्नानं समाचरेत्” संव०। “भासवानरमार्जारखरोष्ट्राणां शुनां तथा। सूकराणाममेध्यस्य स्पर्शे स्नानं सचेलकम्” व्यासः “षण्डकं कुक्कुटं काकं श्वसृगालशिवाष्टकान्। चितियूपश्मशानानि विड्वराहखराशुचीन्। अवकीर्णिनमन्त्यं च स्पृष्ट्वा स्नानं विधीयते” हारी० “अभोज्यसूतिकाषण्डमार्जाराखुश्वकुक्कुटान्। पतिताविद्धचाण्डालं सृतहारांश्च धर्म्मवित्। संस्पृशन् शुध्यति स्नानात्” मार्क०पु०। “बौद्धान् पाशुपतान् जैनान् लौकायतिककापिलान्। विकर्म्मस्थान् द्विजः स्पृष्ट्वा सचेलोजलमाविशेत्। कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः” षट्त्रिं०। “शैवान् पाशुपतान् स्पृष्ट्वा लौकायतिकनास्तिकान्। विकर्म्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्” ब्रह्मा० पुरा० “शूद्रोच्छिष्टं द्विजः स्पृष्ट्वा उच्छिष्टं शूद्रमेव च। शुचिरप्यवगाह्यैव सचेलं स्नानमाचरेत्” छाग० “स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्” संव० “रजकश्चर्म्मकश्चैव व्याधध्वजोपजीविनौ। निर्णेजकः शौण्डिकश्च नटः शैलूषकस्तथा। मुखेभगस्तथा श्वा च वनिता सर्व्ववर्णगा। चक्री ध्वजी व्याधयाजी” इत्युपक्रम्य “एभिर्यदङ्गं संस्पृष्टं शिरोवर्जं द्विजातिषु। तोयेन क्षालनं कृत्वा आचान्ताः प्रयता मताः” शाता०। “ऊर्द्ध्वं नाभेः करौ मुक्त्वा यदङ्गं स्पृशते खगः। स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यति” जातू०। “नीलीं नीलीविकारं च मानुषास्थीन्यपि द्विजः। चण्डालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत्” संव० “स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः” स्कन्द०पु० “अष्टम्यां च चतुर्द्दश्यां दिवा पर्व्वणि मैथुनम्। कृत्वा सचेलं स्नात्वा च वारुणीभिश्च मार्जयेत्” शाट्यायनिः। “रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला” अङ्गि० “रजस्वला चतुर्थेऽह्नि स्नानाच्छुद्धिमवाप्नुयात्” शङ्खः “शुद्धा भर्त्तुश्चतुर्थेऽह्नि स्नाता नारी रजस्वला। दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति” अङ्गि०। “रोगेण यद्रजः स्त्रीणामत्यर्थं तु प्रवर्त्तते। अशुच्योनैव तास्तेन येन वैकारिकं हि तत्” शङ्ख० “अकाले यद्भवेत् स्त्रीणाम् रक्तमाहुर्मनीषिणः। काले तु तद्रजः प्रोक्तं तस्मात्तत्रैव साऽशुचिः” छाग०। एवमन्यान्यपि तद्बोधकान्यनुसन्धेयानि। शुचितत्कालजीविनः कर्म्माधिकारित्वेन शुद्धेः कर्त्तृविशेषणतया कर्म्माङ्गत्वमशुद्धेश्च तदधिकारित्वाभावः एवं तयोः कर्त्तृविशेषणतया कर्म्माधिकाराङ्गानङ्गत्वे निरूपिते। इदानीं द्रव्याणामपि कर्म्माङ्गतया द्रव्यगतशुद्ध्यशुद्धी निरूप्येते तत्र कालरूपद्रव्यस्याशुद्धिः ३९पृष्ठे अकालशब्दे उक्तप्राया। पर्य्युदस्तकालानां तु कर्मानङ्गत्वेऽपि नाशुद्धत्वम्। “रात्रौ श्राद्धं न कुर्वीत” “आसुरी रात्रिरन्यत्र तस्मात्तां परिवर्ज्जयेत्” राक्षसी नाम सा वेला गर्हिता सर्व्वकर्मसु” इत्यादौ तत्तत्कर्मणां तदितरकाले कर्त्तव्यतामात्रं बोध्यते न तु तेषामशुद्धत्वमपि तेन सन्ध्यावन्दनादेः सन्ध्यारात्र्योः कर्त्तव्यताविधायकं “पश्चिमां तु समासीनोयावत्तारकदर्शनमित्यादि” “दिवोदितं यत् कर्म्मेत्युपक्रम्य शर्व्वर्याः प्रथमे यामे तत् कुर्वीताविचारयन्नित्यादि” च शास्त्रं सार्थकम्। अपरद्रव्यगते शुद्ध्यशुद्धी तावदिदानीं निरूप्येते। तत्रादौ द्रव्यशुद्ध्यशुद्धिसम्पादकं द्रव्यादिकमुच्यते। “शारीरैर्मलैः सुराभिर्मद्यैर्यदुपहतं तदत्यन्तोपहतम्। अत्यन्तोपहतं सर्व्वलौहभाण्डमग्नौ प्रक्षिप्तं शुध्येत् मणिमयमश्ममयमब्जं च सप्तरात्रं महीनिखननेन शुध्येत् दन्ता-